संस्कृत-वार्ता:

19.12.2025

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· विकसितभारत जी. राम. जी. इति विधेयकादीनि अनेकानि ऐतिहासिक- विधेयकानि स्वीकृत्य, संसदः शीतकालिक-सत्रस्य समापनम् अभवत्।

· राष्ट्रपतिः द्रौपदी मुर्मु इत्येषा प्रशासनिक-सेवा-नियुक्तिषु सत्यनिष्ठायाः प्रामाणिकतायाः च उपरि अवधानं दातव्यमिति अवोचत्।

· नागरिक-विमानन-मन्त्रालयः उत्तरभारते कुहुकाच्छादनस्य दृष्ट्या अद्यतनानि विवरणानि द्रष्टुं यात्रिकान् अभ्यर्थयत्।

· पुरुष-क्रिकेट्-क्रीडायां, अद्य सायङ्काले अहमदाबाद्-नगरे भारत-दक्षिण-आफ़्रिका-देशयोः मध्ये पञ्चमा अन्तिमा च टी-20- इति अन्ताराष्ट्रिय-क्रीडा भविष्यति।

<u>सदनावसानम्/लो.स./रा.स.</u>

संसदः उभयसदनयोः नवदशदिवसानां शीतकालीनसत्रस्य अनिर्दिष्टकालाय स्थगनमजायत्। लोकसभायाः अध्यक्षः ओम्-बिरला-वर्यः स्वस्य समापनोद्बोधने अवदत् यत् सभायाः उत्पादकता प्रायः एकादशाधिकैकशत- प्रतिशतम् आसीत्। सः अवदत् यत् सभायाः आहत्य पञ्चदश-उपवेशनानि अभवन्। सभायाः सुगमतया सञ्चालने सहकाराय च सः सर्वेभ्यः सदस्येभ्यः धन्यवादान् अयच्छत्।

राज्यसभायाः सभापतिः सी. पी. राधाकृष्णन् वर्यः स्वस्य समापनोद्बोधने अवदत् यत् सभायां प्रायः द्विनवतिहोराः कार्यम् अभवत्, एकविंशत्यधिकैकशत- प्रतिशतञ्च उत्पादकत्वमभवदिति। सः अवदत् यत् सत्रे एकोनषष्टिः स्वायत्तसदस्यानां विधेयकाः प्रस्तुताः सन्ति। सः अवदत् यत्

ऐतिहासिक-लोकतान्त्रिक-महत्त्वस्य विषयेषु उच्च-गुणवत्तायुक्तैः वादविवादैः, चर्चया च सत्रमिदं चिह्नितमासीत्। सः अवदत् यत्, राष्ट्रियगीतस्य वंदे मातरम् इत्यस्य सार्धैकशततमे वार्षिकोत्सवावसरे सभायां विशेष-चर्चा अभवत्, यस्मिन् द्व्यशीतिः सदस्याः चर्चायां भागम् अगृह्णन्। सः अवदत् यत् सभायां निर्वाचन-परिष्कारेति विषये अपि चर्चा अभवत् यस्मिन् सप्तपञ्चाशत् सदस्याः देशस्य लोकतान्त्रिक-प्रक्रियायाः सुदृढीकरण-विषये स्वविचारान् पटलं पुरतः स्थापितवन्तः। राज्यसभाप्रमुखः ह्यस्तनीयं कोलाहलमपि समुल्लेखयन् चिन्तां प्रकटितवान्।

## राष्ट्रपति: राष्ट्रीय-सम्मेलनम्

राष्ट्रपति: द्रौपदी मुर्मु वर्या हैदराबादे राज्य-लोक-सेवा आयोगस्य अध्यक्षाणां द्वि-दिवसीय-राष्ट्रिय-सम्मेलनम् उद्घाटितवती। अवसरेऽस्मिन् राष्ट्रपति: प्रतिपादितवती यत् भारतीय-प्राशासनिक-सेवाधिकारिणां प्रवेश-प्रक्रियायां सत्य-निष्ठा-निष्पक्षतां च सर्वोच्च-प्राथमिकता स्तरे सन्धारयितुं स्व वक्तव्यं प्रितपादितवती। राष्ट्रपतिना प्रोक्तं यत् राजनीतिक-आर्थिक-शक्त्या देशं अग्रे सर्तुं लोक-सेवकानां भूमिका महती आवश्यकी वर्तते। संघ-लोकसेवा-आयोगस्य अध्यक्षेण अजयकुमारेण प्रोक्तं यत् विधि-नियमानुसारेण प्रवेश-प्रणालिकां सुदृढं कर्तुं नालसर-विश्वविद्यालय- हैदराबाद -राज्य-लोक-सेवा-आयोगानां च सक्रिया भूमिका महत्वपूर्णा वर्तते।

## यादव-वायु-प्रदूषणम्

केन्द्रीय-पर्यावरण-वन-ऋतु-परिवर्तन मन्त्रिणा भूपेन्द्र-यादवेन प्राधिकरणं निर्दिष्टं यत् दिल्ली-राजधानी-क्षेत्रे-सप्ताहाभ्यन्तरे वायो: गुणवत्तां भद्रतम-लाभाय प्रयासा: कुर्यु:। तेन प्रतिपादितं यत् नवदिल्ल्यां वायु-प्रदूषण-सम्बद्ध-उच्च-स्तरीयं समीक्षोनपवेशनं सञ्जातम्। मन्त्रिणा प्रोक्तं यत् सन्दर्भेऽस्मिन् समीक्षित- प्रस्ताव: दिल्ली-हरियाणा- उत्तर प्रदेशीय-नगर-निगमेभ्य: प्रेषित:। तेन उद्घोषितं यत् जनवरी-मासे सन्दर्भेऽस्मिन् दृढोपाया: विधास्यन्ते। तेन प्राधिकरणं निर्दिष्टं यत् मार्गीय धूलिं, विनिर्माणकार्याणि अपि अवरूद्धानि भवेयु:।

## नागर-विमानन-सुरक्षा

नागर-विमान-सचिवेन समीर सिन्हा वर्येण प्रोक्तं यत् विगतैक-दशके आन्तरिक- विमान-यातायाते नव-प्रतिशन्मिता वार्षिकवृद्धिः आकलिता। नवदिल्ल्यामद्य सुरक्षा-सम्मेलनं सम्बोधयन् असौ उक्तवान् यत् एयर-कार्गो इत्यस्मिन् द्वि-दशमलव-नव प्रतिशन्मिता वृद्धिः सञ्जातास्ति। तेन भणितं यत् भारतीय-नागर-विमानन-कार्गो इत्यस्य संख्यायां चतुर्दशोत्तर-द्विसहस्रतम-वर्षात् पञ्चनवत्यधिक-त्रिशततः विवर्ध्य अधुना पादोन-अष्ट-शताधिका वृद्धिः सुनिश्चिता।

## नागरिक-उड्डयन-परामर्शः

नागरिक-विमानन-मन्त्रालयः प्रतिपादितवान् यत् उत्तर-भारतस्य क्षेत्रेषु कुञ्झटिकायाः कारणात् वैमानिकःसेवाः प्रभाविताः सन्ति। मन्त्रालयेन यात्रिणः अध्यर्थिताः यत् ते वैमानिक- सूचना-सम्पर्क-यात्रायाः अतिरिक्त- समय-प्रदान-सम्बद्ध-सर्वासां सेवानां विषये जागरूकाः भवेयुः। यात्रिणां सहायतार्थं विमान-पत्तनेऽपि यात्री सुविधा दलं नियुक्तमस्ति।

## पीएम-पश्चिम बंगाल-असम भ्रमणम्

प्रधानमन्त्री नरेन्द्रमोदी श्वः पश्चिमबङ्गप्रदेशस्य भ्रमणे भविष्यति। भ्रमणकाले प्रधानमन्त्री नदिया-जनपदस्य राणाघाट् इत्यत्र राष्ट्रिय-राजमार्ग-परियोजनानां शिलान्यासम् उद्घाटनञ्च करिष्यति, सः तत्र जनसमूहमपि सम्बोधयिष्यति। प्रधानमन्त्री मोदी प्रायः द्वात्रिंशत् कोटिरूप्यकाणां द्वयोः राष्ट्रियराजमार्गयोः परियोजनानां उद्घाटनम्, शिलान्यासञ्च करिष्यति। एते प्रकल्पाः कोलकाता-सिलिगुडी-नगरयोः मध्ये महत्त्वपूर्ण-सम्पर्क-मार्गरूपेण कार्यं करिष्यन्ति। एते मार्गाः यात्राकालम् प्रायः घण्टाद्वयं यावत् न्यूनी-करिष्यन्ति, येन वाहनानां द्रुतं सुगमञ्च सञ्चारः सुनिश्चितः भविष्यति। प्रधानमन्त्री श्वस्तनादेव आरभ्य असम-राज्यस्यापि द्विदिवसीय-यात्राम् आरप्स्यते। भ्रमणकाले प्रधानमन्त्री लोकप्रिय-गोपीनाथ-बारदोलोयी-अन्ताराष्ट्रिय-विमानस्थानकस्य नूतन-टर्मिनलाख्यस्य भवनस्य उद्घाटनं करिष्यति। भ्रमणस्य अन्तिमे दिने श्रीमोदी गुवाहाटी-इत्यत्र बोरगाव्-नगरस्य स्वोहिद्-स्मारकक्षेत्रे ऐतिहासिकस्य

असम-आन्दोलनस्य हुतात्मान् प्रति श्रद्धाञ्जलिम् अर्पयिष्यति। पश्चात् प्रधानमन्त्री असम-वैली-फर्टिलायज़र-एण्ड-केमिकल्-कम्पनी-लिमिटेड् इत्यस्य अमोनिया-यूरिया-इति परियोजनायाः भूमि-पूजनमपि करिष्यति।

सिन्धिया-उत्तरपूर्वप्रदेशः

पूर्वोत्तरक्षेत्रस्य विकासमन्त्री ज्योतिरादित्यसिन्धिया वर्यः अद्य पूर्वोत्तरक्षेत्रे हस्ततन्तूनां हस्तशिल्पस्य च सुदृढीकरणार्थं उच्च-स्तरीय-कार्यबल-सभायां आभासीय-माध्यमेन भागम् अगृह्णात्। सामाजिकप्रसार-माध्यमे, श्रीसिन्धिया वर्यः अवदत् यत् सभैषा कौशल-उन्नयनम्, गुणवत्ता-प्रमाणीकरणेन सह अस्मिन् प्रदेशे सुस्थिर-तन्तु-वर्ण-इत्यादीनां प्रमुख-क्षेत्राणां विषये केन्द्रितम् आसीदिति।

डीएआरपीजी-सुशासन-सप्ताह:

लोक-परिदेवना-मन्त्रालय: डी.ए.आर.पी.जी. इति प्रवर्तमान वर्षस्य दिसम्बर-मासे प्रशासन-गांव-की-ओर इति विषय-पुरस्सरं सु-शासन-सप्ताह: आमानयति। सप्ताहस्य आयोजनं अद्य प्रभृति प्रारब्धम्। अस्योद्देश्यं नवदिल्ल्यां राष्ट्रव्यापि-दिङ्गनिर्देशानां प्रसारणम् अस्ति। डी.ए.आर.पी.जी. इत्यस्य सचिवा रचना सिन्हा वर्या भणितवती यत् सुशासनं मूल-रूपेण भद्रतम-सेवा-प्रदानस्य-भावं प्रदर्शयति।

टी-20 क्रिकेटः भारत vs दक्षिण अफ्रीका

पुरुष-क्रिकेट्-क्रीडायां भारत-दक्षिण-अफ्रीका-देशयोः मध्ये पञ्चमा अन्तिमा च टी-20-अन्ताराष्ट्रिय-क्रीडा अद्य अहमदाबाद्-नगरस्य नरेन्द्र-मोदी-क्रीडाङ्गणे भविष्यति। क्रीडा सायं सप्तवादने आरप्स्यते। सूर्यकुमार यादव इत्यस्य नेतृत्वे भारतं सम्प्रति एकांकस्योत्तरे अंकद्वयेन अग्रे अस्ति। बुधवासरे लखनऊ-नगरस्य एकाना-क्रीडाङ्गणे आयोजिता चतुर्थी क्रीडा कुहुकाधिक्येन निरस्ता आसीत्।

।। इति वार्ताः ।।